# अङ्गुलीनां कलहः

एकदा अङ्गुलीनां कलहः भवति। अङ्गुष्ठः तर्जनी मध्यमा अनामिका कनिष्ठिका च कलहं कुर्वन्ति। "अहम् अङ्गुलीनां राजा । अहम् अङ्गुलीनां राजा" इति। ते सर्वे निर्णयार्थं न्यायस्थानं गच्छन्ति। धर्माध्यक्षस्य पुरतः तिष्ठन्ति च।

प्रथमम् अङ्गुष्ठः अग्रे आगच्छति वदति च। "अहं अङ्गुष्ठः। अहं बलिष्ठः। अहं दृढतमः। अहमेव राजा।" इति।

अनन्तरं तर्जनी अग्रे आगच्छति वदति च। "अहं तर्जनी। अहं सर्वान् तर्जयामि। अहं सर्वं सूचयामि। अहं सर्वं दर्शयामि। अतः अहमेव राजा।" इति।

अनन्तरं मध्यमा उत्तिष्ठति वदति च। "अहं मध्यमा। अहं दीर्घतमा अतः अहमेव राजा।" इति।

अनन्तरम् अनामिका अग्रे आगच्छति वदति च। "अहम् अनामिका। अहं धनिकतमा। अहं बहुरत्नखचितं कनकमयम् अङ्गुलीयकं धारयामि। अतः अहमेव राजा।" इति।

अन्ते कनिष्ठिका मन्दम् उत्तिष्ठति। अग्रे आगच्छति वदति च। "अहम् अङ्गुष्ठः इव न बलिष्ठा। अहं तर्जनी इव तर्जयितुं न शक्नोमि। अहं मध्यमा इव न दीर्घा। अहं तु लघुतमा। अहम् अनामिका इव न धनिका। अङ्गुलीयकं न धारयामि। परन्तु जनाः यदा नमस्कारं कुर्वन्ति तदा अहमेव अग्रे भवामि। महोदयानां श्रेष्ठानां मम एव प्रथमदर्शनं भवति।" इति।

एतत् सर्वं श्रुत्वा धर्माधिकारी कनिष्ठिका एव सर्वासाम् अङ्गुलीनां राजा भवितुम् अर्हति इति निर्णयं करोति।